श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधि स्वामिना विरचितम्

# ॥ श्रीधनुष्पुरीश श्रीराजगोपालकृष्णस्वामि मङ्गलम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः
श्रीमते रामानुजाय नमः

# ॥ श्रीधनुष्पुरीश श्रीराजगोपालकृष्णस्वामि मङ्गलम् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

राजगोपालकृष्णाय राजराजनुताङ्घ्रये।
राजीवदलनेत्राय राजवक्त्राय मङ्गलम्॥ १ ॥

धनुष्पुरनिवासाय धन्विनव्यपुरीभुवः।
भुवो मानसवासाय राजगोपाय मङ्गलम्॥ २ ॥

धराधरकिशोराय धाराधरसमत्विषे।
शरासनपुरीपुण्यधराधाराय मङ्गलम्॥ ३ ॥

कृष्णाम्बुदनिकाशाय कृष्णारक्षणकारिणे।
कृष्णातीरविहाराय कृष्णाय मम मङ्गलम्॥ ४ ॥

आकुलं गोकुलं पातुं विपुलाचलधारिणे।
श्रीगोपकुलपालाय गोपबालाय मङ्गलम्॥ ५ ॥

धनुर्भञ्जननादेन कंसकम्पप्रदायिने।
धनुष्पत्तननाथाय राजगोपाय मङ्गलम्॥ ६ ॥

देवकीपरमानन्ददायिने मायिने परम्।
देवानामपि सेव्याय राजगोपाय मङ्गलम्॥ ७ ॥

रुक्मिणीसत्यभामाभ्यां भूषाभ्यां निजपार्श्वयोः।
कलापिकण्ठकान्ताय कृष्णाय मम मङ्गलम्॥ ८ ॥

चापपत्तननाथाय पापपत्तनभेदिने।
राधावदनतृष्णाय कृष्णाय मम मङ्गलम्॥ ९ ॥

www.prapatti.com

मङ्गलाशासनपरैर्मदाचार्यपुरोगमैः।
सर्वैश्च पूर्वैः पूज्याय राजगोपाय मङ्गलम्॥ १० ॥

कविश्रीनिधिना क्लृप्तं राजगोपालमङ्गलम्।
पठतां भविता नित्यं नित्यश्रीर्नित्यमङ्गलम्॥ ११ ॥

॥ इति श्रीधनुष्पुरीश श्रीराजगोपालकृष्णस्वामि मङ्गलं समाप्तम्॥

www.prapatti.com